# Supplementary Material 2

## COMPILATION OF REFERENCES FROM CLASSICAL AYURVEDIC TEXTS

## Description of Epidemics

***Suśrutasamhitā, Sūtrasthānaṃ, 6.19-20***
कदाचिदव्यापन्नेष्वपि ऋतुषु कृत्याभिशापरक्षःक्रोधाधर्मैरुपध्वस्यन्ते जनपदाः, विषौषधिपुष्पगन्धेन वा वायुनोपनीतेनाक्रम्यते यो देशस्तत्र दोषप्रकृत्यविशेषेण कासश्वासवमथुप्रतिश्यायशिरोरुग्ज्वरैरुपतप्यन्ते, ग्रहनक्षत्रचरितैर्वा, गृहदारशयनासनयानवाहनमणिरत्नोपकरणगर्हितलक्षणनिमित्तप्रादुर्भावैर्वा ||

***Dalhaṇa's comments on above***
अन्ये तु कासश्वासेत्यादिपाठमन्यथा पठन्ति-
'कासश्वासप्रतिश्यायगन्धाज्ञानभ्रमशिरोरुग्ज्वरमसूरिकादिभिरुपतप्यन्ते' इति, व्याख्यानयन्ति च- तत्र नासारन्ध्रानुगतेन वायुना कासश्वासप्रतिश्यायगन्धाज्ञानभ्रमशिरोरुजः, त्वगिन्द्रियगतेन ज्वरमसूरिकादयः|

***Carakasamhitā, Vimānasthānaṃ, 3.3-6***
तमुवाच भगवानात्रेयः- एवमसामान्यावतामप्येभिरग्निवेश! प्रकृत्यादिभिर्भावैर्मनुष्याणां येऽन्ये भावाः सामान्यास्तद्वैगुण्यात् समानकालाः समानलिङ्गाश्च व्याधयोऽभिनिर्वर्तमाना जनपदमुद्ध्वंसयन्ति|
ते तु खल्विमे भावाः सामान्या जनपदेषु भवन्ति; तद्यथा- वायुः, उदकं, देशः, काल इति||

***Suśrutasamhitā, Nidānasthānaṃ, 5.33-34***
कुष्ठं ज्वरश्च शोषश्च नेत्राभिष्यन्द एव च |
औपसर्गिकरोगाश्च सङ्क्रामन्ति नरान्नरम् ||३४||

***Suśrutasamhitā, Sūtrasthānaṃ, 6.20***
तत्र, स्थानपरित्यागशान्तिकर्मप्रायश्चित्तमङ्गलजपहोमोपहारेज्याञ्जलिनमस्कारतपोनियम-दयादानदीक्षाभ्युपगमदेवताब्राह्मणगुरुपरैर्भवितव्यम्, एवं साधु भवति ||२०||

***Carakasamhitā, Vimānasthānaṃ, 3.15-16***
सद्धृत्तस्यानुवृत्तिश्च प्रशमो गुप्तिरात्मनः||१५||
हितं जनपदानां च शिवानामुपसेवनम्|

***Aṣṭāṅgahṛdayaṃ, Sūtrasthānaṃ, 1.33***
भूताद्यस्पर्शनोपायो निर्दिष्टश्च पृथक् पृथक्।
अनुत्पत्त्यै समासेन विधिरेषः प्रदर्शितः।।

## Description and Classification of Āgantujvaras

***Carakasamhitā, Nidānasthānaṃ, 1.17***
अथ खल्वष्टाभ्यः कारणेभ्यो ज्वरः सञ्जायते मनुष्याणां; तद्यथा- वातात्, पित्तात्, कफात्, वातपित्ताभ्यां, वातकफाभ्यां, पित्तकफाभ्यां, वातपित्तकफेभ्यः, आगन्तोरष्टमात् कारणात्||१७||

***Carakasamhitā, Cikitsāsthānaṃ, 3.111-112***
आगन्तुरष्टमो यस्तु स निर्दिष्टश्चतुर्विधः||१११||
अभिघाताभिषङ्गाभ्यामभिचाराभिशापतः|

***Carakasamhita, Cikitsasthanaṃ, 3.114-115***
कामशोकभयक्रोधैरभिषक्तस्य यो ज्वरः||११४||
सोऽभिषङ्गाज्वरो ज्ञेयो यश्च भूताभिषङ्गजः|

***Carakasamhitā, Śārirasthānaṃ, 1.121***
यो भूतविषवातानामकालेनागतश्च यः|
स्नेहशीतोष्णसंस्पर्शो मिथ्यायोग स उच्यते||१२१||

***Cakrapāṇi's comments on above***
भूताः सविषिक्रिमिपिशाचादयः|

***Mādhavanidānam, Kuṣṭhanidānaṃ, 42-43***
औपसर्गिकरोगा इति [१] औपसर्गिकाः पापरोगादयो भूतोपसर्गजाश्च| सङ्क्रामन्ति आविशन्ति|

***Suśrutasamhitā, Uttaratantraṃ, 39.68***
केचिद्भूताभिषङ्गोत्थं ब्रुवते विषमज्वरम् ||६८||

***Suśrutasamhitā, Nidānasthānaṃ, 5.33-34***
प्रसङ्गाद्गात्रसंस्पर्शान्निश्वासात् सहभोजनात् |
सहशय्यासनाच्चापि वस्त्रमाल्यानुलेपनात् ||३३||
कुष्ठं ज्वरश्च शोषश्च नेत्राभिष्यन्द एव च |
औपसर्गिकरोगाश्च सङ्क्रामन्ति नरान्नरम् ||३४||

***Carakasaṃhitā, Vimānasthānaṃ, 3.115-116***
कामशोकभयाद्वायुः, क्रोधात् पित्तं, त्रयो मलाः||११५||
भूताभिषङ्गात् कुप्यन्ति भूतसामान्यलक्षणाः|

***Aṣṭāṅgahṛdayaṃ, Nidānasthānaṃ, 2.43***
ग्रहादौ सन्निपातस्य भयादौ मरुतस्त्रये।।

***Aṣṭāṅgahṛdayam, Cikitsasthānaṃ, 1.171***
ते ज्वराः केवलाः पूर्वं व्याप्यन्तेऽनन्तरं मलैः।।

## Description of Kṛmis (Pathogens)

***Carakasamhitā, Vimānasthānaṃ, 7.11***
शोणितजानां तु खलु कुष्ठैः समानं समुत्थानं; स्थानं- रक्तवाहिन्यो धमन्यः; संस्थानम्- अणवो वृत्ताश्चापादाश्च, सूक्ष्मत्वाच्चैके भवन्त्यदृश्याः

***Carakasamhitā, Vimānasthānaṃ, 7.9***
अथास्मै प्रोवाच भगवानात्रेयः- इह खल्वग्निवेश! विंशतिविधाः क्रिमयः पूर्वमुद्दिष्टा नानाविधेन प्रविभागेनान्यत्र सहजेभ्यः; ते पुनः प्रकृतिभिर्विभज्यमानाश्चतुर्विधा भवन्ति; तद्यथा- पुरीषजाः, श्लेष्मजाः, शोणितजा, मलजाश्चेति||९||

***Cakrapāṇi on Carakasamhitā Vimānasthānaṃ, 7.9***
अन्यत्र सहजेभ्य इत्यनेन शरीरसहजास्त्ववैकारिकाः क्रिमयो विंशतेरप्यधिका भवन्तीति दर्शयति| क्रिमीणां सञ्ज्ञा स्वशास्त्रव्यवहारसिद्धा देशान्तरप्रसिद्धा च बोद्धव्या|

***Suśrutasamhitā, Śārīrasthānaṃ, 1.16***
तथाहि भोजः- "शुभाशुभाभ्यां कर्मभ्यां प्रेरणान्मनसो गतेः| देहाद्देहान्तरं याति क्रिमिवच्छाश्वतोऽव्ययः||

## Description of Sannipātajvara

***Aṣṭāṅgahṛdayam, Nidānasthānaṃ, 2.27-33***
सर्वजो लक्षणैः सर्वैः …………
…………….. प्रततं कण्ठकूजनम्।।

***Suśrutasamhitā, Uttaratantraṃ, 39.35-38***
निद्रानाशो भ्रमः श्वासस्तन्द्रा सुप्ताङ्गताऽरुचिः |
तृष्णा मोहो मदः स्तम्भो दाहः शीतं हृदि व्यथा ||३५||
पक्तिश्चिरेण दोषाणामुन्मादः श्यावदन्तता |
रसना परुषा कृष्णा सन्धिमूर्धास्थिजा रुजः ||३६||
निर्भुग्ने कलुषे नेत्रे कर्णौ शब्दरुगन्वितौ |
प्रलापः स्रोतसां पाकः कूजनं चेतनाच्युतिः ||३७||
स्वेदमूत्रपुरीषाणामल्पशः सुचिरात् स्रुतिः |३८|

***Dalhaṇa's comments on Suśrutasamhitā, Uttaratantraṃ, 39.43-44***
यद्यपि तन्त्रान्तरे सन्निपातभेदास्त्रयोदश प्रोक्ताः, तथाऽपि दोषोत्कर्षापकर्षतारतम्येन धात्वावरणभेदेन च सन्निपातभेदानामानन्त्यान्नेह प्रदर्शिताः||४३-४४||

***Yogaratnākara, Jvara, 2-12***
शिरोर्त्तिकण्ठग्रहदाहमोहकम्पज्वराः रक्तसमीरणार्त्तिः। हनुग्रहस्तापविलापमूर्च्छाः स्यात्कण्ठकुब्जः खलु कष्टसाध्यः।।

***Bhavaprakāśa, Madhyama Khaṇda, 1.439-526***
कण्ठःशूकशतावरुद्धवदतिश्वासः प्रलापोरुचिर्विदाहो
देहरुजा तृषापि च हनुस्तम्भः शिरोर्त्तिस्तथा।
मोहो वेपथुना सहेति सकलं लिङ्गं त्रिदोषजवरे यत्र
स्यात्स हि कण्ठकुब्ज उदितः प्राच्यैश्चिकित्साबुधैः।।५०५

***Jvaranirṇaya of Narayanapaṇḍita, Tridosajaprakaraṅaṃ 1-241***
This chapter of the book deals with *sannipātajvara* in such detail that is not found in other texts. All possible classifications of *sannipātajvara* have been harmonised in this chapter.

***Carakasamhitā, Cikitsāsthānaṃ, 3.103-109***
सन्निपातज्वरस्योर्ध्वमतो वक्ष्यामि लक्षणम्|
क्षणे दाहः क्षणे शीतमस्थिसन्धिशिरोरुजा||१०३||
सास्रावे कलुषे रक्ते निर्भुग्ने चापि दर्शने [२] |
सस्वनौ सरुजौ कर्णौ कण्ठः शूकैरिवावृतः||१०४||
तन्द्रा मोहः प्रलापश्च कासः श्वासोऽरुचिर्भ्रमः|
परिदग्धा खरस्पर्शा जिह्वा स्रस्ताङ्गता परम्||१०५||
ष्ठीवनं रक्तपित्तस्य कफेनोन्मिश्रितस्य च|
शिरसो लोठनं तृष्णा निद्रानाशो हृदि व्यथा||१०६||
स्वेदमूत्रपुरीषाणां चिराद्दर्शनमल्पशः|
कृशत्वं नातिगात्राणां प्रततं कण्ठकूजनम्||१०७||
कोठानां श्यावरक्तानां मण्डलानां च दर्शनम्|
मूकत्वं स्रोतसां पाको गुरुत्वमुदरस्य च||१०८||
चिरात् पाकश्च दोषाणां सन्निपातज्वराकृतिः|१०९|

***Carakasamhitā, Cikitsāsthānaṃ, 3.92***
शैत्यं कासोऽरुचिस्तन्द्रापिपासादाहरुग्व्यथाः|
वातश्लेष्मोल्बणे व्याधौ लिङ्गं पित्तावरे विदुः||९२||

***Aṣṭāṅgahṛdayam, Nidānasthānaṃ, 2.34***
दोषे विबद्धे नष्टेऽग्नौ सर्वसम्पूर्णलक्षणः||
असाध्यः सोन्यथा कृच्छ्रो भवेद्वैकल्यदोपि वा।।

***Suśrutasamhitā, Uttaratantraṃ, 39.45,46***
सप्तमे दिवसे प्राप्ते दशमे द्वादशेऽपि वा ||४५||
पुनर्घोरतरो भूत्वा प्रशमं याति हन्ति वा |४६|

***Cakrapāṇidatta on Carakasamhitā, Cikitsāsthānaṃ, 3.109,110***
यदुक्तं- "सन्निपातो दुःश्चिकित्स्यानां" (सू.अ.२५) इति, तथा च भालुकिना- "मृत्युना सह योद्धव्यं सन्निपातं चिकित्सता" इति||१०९||-

***Jvaranirṇaya, Tridoṣaja Verse 1***
त्रयोदशापि त्रिकजाः द्वेधा द्वन्द्वजवन्मताः।
तत्रापि प्रकृतिसमसमवेतान् वदाम्यहम्।।

## Description of the critical stage of Ojonirodha

***Suśrutasamhitā, Uttaratantraṃ, 39.43-45***
ओजो विस्रंसते यस्य पित्तानिलसमुच्छ्रयात् |
स गात्रस्तम्भशीताभ्यां शयनेप्सुरचेतनः [१] ||४३||
अपि जाग्रत् स्वपन् जन्तुस्तन्द्रालुश्च प्रलापवान् |
संहृष्टरोमा स्रस्ताङ्गो मन्दसन्तापवेदनः ||४४||
ओजोनिरोधजं तस्य जानीयात् कुशलो भिषक् |४५|

## Symptoms specifically seen in Jvara based on doṣa dominance

***Carakasamhitā, Cikitsāsthānaṃ, 3.86-87***
शीतको गौरवं तन्द्रा स्तैमित्यं पर्वणां च रुक्||८६||
शिरोग्रहः प्रतिश्यायः कासः स्वेदाप्रवर्तनम्|
सन्तापो मध्यवेगश्च वातश्लेष्मज्वराकृतिः||८७||

***Carakasamhitā, Cikitsāsthānaṃ, 17.45***
यदा स्रोतांसि संरुध्य मारुतः कफमूर्च्छितः।
विष्वग्व्रजति संरुद्धस्तदा श्वासान् करोति सः।।

***Aṣṭāṅgahṛdayam, Nidānasthānaṃ, 1.25***
तापहान्यरुचिपर्वशिरोरुक् पीनसश्वसनकासविबन्धाः।
शीतजाड्यतिमिरभ्रमतन्द्राः श्लेष्मवातजनितज्वरलिङ्गम्।।

***Aṣṭāṅgahṛdayam, Nidānasthānaṃ, 1.18-20***
युगपद्व्याप्तिरङ्गानां प्रलापः कटुवक्त्रता।
नासास्यपाकः शीतेच्छा भ्रमो मूर्च्छा मदोरतिः।।
विट्स्रंसः पित्तवमनं रक्तष्ठीवनमम्लकः।
रक्तकोठोद्गमः पीतहरितत्वं त्वगादिषु।।
स्वेदो निःश्वासवैगन्ध्यमतितृष्णा च पित्तजे।

***Aṣṭāṅgahṛdayam, Cikitsāsthānaṃ, 1.172***
न हि ज्वरोनुबध्नाति मारुताद्यैर्विना कृतः।।

***Aṣṭāṅgahṛdayam, Nidānasthānaṃ, 3.22-24***
वातलैर्कुपितो वातः शुष्कोरःकण्ठवक्त्रताम्।
हृत्पार्श्वोरःशिरःशूलं मोहक्षोभस्वरक्षयान्।।
करोति शुष्कं कासं च महावेगरुजास्वनम्।।

***Aṣṭāṅgahṛdayam, Nidānasthānaṃ, 3.26-27***
कफादुरोलपरुङ्मूर्धहृदयं स्तिमितं गुरु।
कण्ठोपलेपः सदनं पीनसच्छर्द्यरोचकाः।।
रोमहर्षो घनस्निग्धश्वेतश्लेष्मप्रवर्तनम्।।

## Stages of Jvara

***Carakasamhitā, Cikitsāsthānaṃ, 3.133-136***
अरुचिश्चाविपाकश्च गुरुत्वमुदरस्य च||१३३||
हृदयस्याविशुद्धिश्च तन्द्रा चालस्यमेव च|
ज्वरोऽविसर्गी बलवान् दोषाणामप्रवर्तनम्||१३४||
लालाप्रसेको हृल्लासः क्षुन्नाशो विरसं [१] मुखम्|
स्तब्धसुप्तगुरुवं च गात्राणां बहुमूत्रता||१३५||
न विड् जीर्णा न च ग्लानिर्ज्वरस्यामस्य लक्षणम्|

***Carakasamhitā, Cikitsāsthānaṃ, 3.137-138***
क्षुत् क्षामता लघुत्वं च गात्राणां ज्वरमार्दवम्||१३७||
दोषप्रवृत्तिरष्टाहो निरामज्वरलक्षणम्|१३८|

## General signs of bad prognosis in a disease

***Aṣṭāṅgahṛdayam, Sūtrasthānaṃ***
अनुपक्रम एव स्यात् स्थितोऽत्यन्तविपर्यये। औत्सुक्यमोहाऽरतिकत् दृष्टरिष्टोऽक्षनाशनः।।

## Methods and approaches to study new diseases in Ayurveda

***Gananathasen's Siddhāntanidāna, 1.33-34***
दोषदूष्यगणेऽभिन्ने संमूर्च्छनविशेषतः। अदृष्टदेशकालादिपरिणामादनेकधाः।।
पुराणाः प्रविलीयन्ते नवीनाः प्रादुरासते। विभिद्यन्ते स्थिताश्चाथ नृणां नानाविधाः गदाः।।

***Carakasamhitā, Cikitsāsthānaṃ, 30.291***
रोगा येऽप्यत्र नोद्दिष्टा बहुत्वान्नामरूपतः|
तेषामप्येतदेव स्याद्दोषादीन् वीक्ष्य भेषजम्||

***Carakasamhitā, Cikitsāsthānaṃ, 30.292***
दोषदूष्यनिदानानां विपरीतं हितं ध्रुवम्|
उक्तानुक्तान् गदान् सर्वान् सम्यग्युक्तं नियच्छति||२९२||

***Aṣṭāṅgahṛdayam, Sūtrasthānaṃ, 12.64-66***
विकारनामाकुशलो न जिह्रीयात् कदाचन|
न हि सर्वविकाराणां नामतोऽस्ति ध्रुवा स्थितिः||४४||
स एव कुपितो दोषः समुत्थानविशेषतः|
स्थानान्तराणि च प्राप्य विकारान् कुरुते बहून् [१] ||४५||
तस्माद्विकारप्रकृतीरधिष्ठानान्तराणि च|
बुद्ध्वा हेतुविशेषांश्च शीघ्रं कुर्यादुपक्रमम्||४६||

***Mādhavanidānam, Chapters 25 (Āmavāta) and Chapter 51 (Amlapitta)***
This text describes new diseases like *Āmavāta* and *Amlapitta*.

## The clinical course and transition of Āgantujvara to Nijajvara

***Carakasamhitā, Nidānasthānaṃ, 1.30***
अभिघाताभिषङ्गाभिचाराभिशापेभ्य आगन्तुर्हि व्यथापूर्वोऽष्टमो ज्वरो भवति|

स किञ्चित्कालमागन्तुः केवलो भूत्वा पश्चाद्दोषैरनुबध्यते|

***Cakrapāṇi on above***

किञ्चित्कालमिति स्तोककालं; केचित् त्र्यहं वदन्ति, अन्ये सप्ताहमाहुः| आगन्तौ हि सप्ताहादूर्ध्वं दोषलिङ्गानि भवन्तीति दृष्टम्|

***Aṣṭāṅgahṛdayam, Cikitsāsthānaṃ, 1.84***

रुक्षं हि तेजो ज्वरकृत् तेजसा रुक्षितस्य च।।

***Aṣṭāṅgahṛdayam, Cikitsāsthānaṃ, 1.16***

ऊष्मा पित्तादृते नास्ति ज्वरं नास्त्यूष्मणा विना।।

## Description of factors involved in disease resistance and innate strength of the body

***Carakasamhitā, Nidānasthānaṃ, 3.4***

इह खलु निदानदोषदूष्यविशेषेभ्यो विकारविघातभावाभावप्रतिविशेषा भवन्ति|

यदा ह्येते त्रयो निदानादिविशेषाः परस्परं नानुबध्नन्त्यथवा [१] कालप्रकर्षादबलीयांसोऽथवाऽनुबध्नन्ति न तदा विकाराभिनिर्वृत्तिः, चिराद्वाऽप्यभिनिर्वर्तन्ते, तनवो वा भवन्त्ययथोक्तसर्वलिङ्गा वा; विपर्यये विपरीताः; इति सर्वविकारविघातभावाभावप्रतिविशेषाभिनिर्वृत्तिहेतुर्भवत्युक्तः||४||

***Cakrapāṇi on Carakasamhitā, Sūtrasthānaṃ, 28.6***

व्याधिक्षमत्वं व्याधिबलविरोधित्वं व्याध्युत्पादप्रतिबन्धकत्वमिति यावत्|

***Aṣṭāṅgahṛdayam, Sūtrasthānaṃ, 11.37***

ओजस्तु तेजो धातूनां शुक्रान्तानां परं स्मृतम्।।

***Aṣṭāṅgahṛdayam, Sutrasthānaṃ, 11.38***

यन्नाशे नियतं नाशो यस्मिंस्तिष्ठति तिष्ठति।।

***Aṣṭāṅgahṛdayam, Cikitsāsthānaṃ, 1.3***

लङ्घनैर्क्षपिते दोषे दीप्तेग्नौ लाघवे सति।

स्वास्थ्यं क्षुत्तृट् रुचिः पक्तिर्बलमोजश्च जायते।।

***Aṣṭāṅgahṛdayam, Cikitsāsthānaṃ, 1.84***

देहधात्वबलत्वाच्च ज्वरो जीर्णोनुवर्तते।

***Aṣṭāṅgahṛdayam, Cikitsāsthānaṃ, 1.95***

बलं ह्यलं दोषहरं परं तच्च बलप्रदम्।।

***Aṣṭāṅgahṛdayam, Cikitsāsthānaṃ, 1.2***
बलं यत्नेन पालयन्। बलाधिष्ठानमारोग्यं यदर्थोयं क्रियाक्रमः।।

***Carakasamhitā, Sūtrasthānaṃ, 17.117***
प्राकृतस्तु बलं श्लेष्मा विकृतो मल उच्यते|
स चैवौजः स्मृतः काये स च पाप्मोपदिश्यते||११७||

## Description of the sites of manifestation of disease

***Carakasamhitā, Vimānasthānaṃ, 5.8***
तत्र प्राणवहानां स्रोतसां हृदयं मूलं महास्रोतश्च, प्रदुष्टानां तु खल्वेषामिदं विशेषविज्ञानं भवति; तद्यथा- अतिसृष्टमतिबद्धं कुपितमल्पाल्पमभीक्ष्णं वा सशब्दशूलमुच्छ्वसन्तं दृष्ट्वा प्राणवहान्यस्य स्रोतांसि प्रदुष्टानीति विद्यात्|

***Carakasamhitā, Sūtrasthānaṃ, 11.42***
तत्र शाखा रक्तादयो धातवस्त्वक् च, स बाह्यो रोगमार्गः; मर्माणि पुनर्बस्तिहृदयमूर्धादीनि, अस्थिसन्धयोऽस्थिसंयोगास्तत्रोपनिबद्धाश्च स्नायुकण्डराः [१] , स मध्यमो रोगमार्गः; कोष्ठः पुनरुच्यते महास्रोतः शरीरमध्यं महानिम्नमामपक्वाशयश्चेति पर्यायशब्दैस्तन्त्रे, स रोगमार्ग आभ्यन्तरः||४८||

***Carakasamhitā, Sūtrasthānaṃ, 11.43***
तत्र, गण्डपिडकालज्यपचीचर्मकीलाधिमांसमषककुष्ठव्यङ्गादयो विकारा बहिर्मार्गजाश्च
विसर्पश्वयथुगुल्मार्शोविद्रध्यादयः शाखानुसारिणो भवन्ति रोगाः;
पक्षवधग्रहापतानकार्दितशोषराजयक्ष्मास्थिसन्धिशूलगुदभ्रंशादयः शिरोहृद्बस्तिरोगादयश्च
मध्यममार्गानुसारिणो भवन्ति रोगाः;
ज्वरातीसारच्छर्द्यलसकविसूचिकाकासश्वासहिक्कानाहोदरप्लीहादयोऽन्तर्मार्गजाश्च
विसर्पश्वयथुगुल्मार्शोविद्रध्यादयः कोष्ठानुसारिणो भवन्ति रोगाः||४९||

***Aṣṭāṅgahṛdayam, Nidānasthānaṃ, 4.3-4***
कफोपरुद्धगमनः पवनो विष्वगास्थितः।
प्राणोदकान्नवाहीनि दुष्टः स्रोतांसि दूषयन्।।
उरस्थः कुरुते श्वासमामाशयसमुद्भवम्।।

## Description of Āma

***Vijayarakṣita, Śrīkaṇṭhadatta on Mādhavanidānaṃ, 25.1-5***
आममन्नरसं केचित् केचित्तु मलसञ्चयम्।
प्रथमां दोषदुष्टिं वा केचिदामं प्रचक्षते।।

***Aṣṭāṅgahṛdayam, Sūtrasthānaṃ, 13.26***
अन्ये दोषेभ्य एवाति दुष्टेभ्योन्योन्यमूर्च्छनात्।
कोद्रवेभ्यो विषस्यैव वदन्त्यामस्य संभवः।।

## Descriptions related to pathogenesis of disease

***Mādhavanidānaṃ, 1.5-6***
प्राग्रूपं येन लक्ष्यते ||५||
उत्पित्सुरामयो दोषविशेषेणानधिष्ठितः |
लिङ्गमव्यक्तमल्पत्वाद्व्याधीनां [१] तद्यथायथम् ||

***Carakasamhitā, Vimānasthānaṃ 4.7***
गूढलिङ्गं व्याधिमुपशयानुपशयाभ्यां ||

***Cakrapāṇi on Carakasamhitā, Cikitsāsthānaṃ 3.89-109***
सन्निपातज्वरस्योर्ध्वमिति अत्रोर्ध्वशब्देनाधिकवाचिना प्रकृतिसमसमवायारब्धसन्निपातज्वराद्यान्यधिकानि विकृतिविषमसमवायारब्धज्वरस्य लक्षणानि, तानि वक्ष्यामीत्यर्थ इति केचिद्व्याख्यानयन्ति; यदिह सास्रावकलुषनिर्भुग्नलोचनत्वादि वक्तव्यं न तत् पृथग्वातादिज्वरोक्तलक्षणमेलके भवति, किन्तु विकृतिविषमसमवायारब्धे ज्वरे संयोगमहिम्ना भवतीति|

***Caraksamhitā, Cikitsāsthānaṃ, 21.40***
उपद्रवस्तु खलु रोगोत्तरकालजो रोगाश्रयो रोग एव स्थूलोऽणुर्वा, रोगात् पश्चाज्जायत इत्युपद्रवसञ्ज्ञः|
तत्र प्रधानो व्याधिः, व्याधेर्गुणभूत [१] उपद्रवः, तस्य प्रायः प्रधानप्रशमे प्रशमो भवति|
स तु पीडाकरतरो भवति पश्चादुत्पद्यमानो व्याधिपरिक्लिष्टशरीरत्वात्; तस्मादुपद्रवं त्वरमाणोऽभिबाधेत||४०||

***Mādhavanidānaṃ, 2.33***
कुर्याच्चतुर्थकं घोरमन्तकं रोगसङ्करम् ||३३||

**Commentary of Vijayarakṣita on above -** रोगसङ्करम् अनेकरोगसङ्कुलम्||

***Carakasamhitā, Sūtrasthānaṃ, 18.5***
ते पुनर्यथास्वं हेतुव्यञ्जनैरादावुपलभ्यन्ते निजव्यञ्जनैकदेशविपरीतैः